## || श्री स्वामी समर्थ ||

---

|| श्री महा बुद्धि कवच ||

---

श्रीगणेशाय नमः ।
देव्य उवाच ।
महाबुद्धेरसरस्वत्याःकवचं बृहि शङ्कर ।
शिव उवाच ।
महाबुद्धिरसरस्वत्याःकवचस्य महेश्वर्ः ॥१॥

दक्षिणामूर्तिराख्यातः छन्दो अनुष्टुप् प्रकीर्तितम ।
देवता श्री महाबुद्धिः विनियोग्स्तु रक्षणे ॥२॥

ॐ बिजन्तु तथैं शक्तिः नमो वै कीलकं स्मृतम ।
त्रिपदैक्ष्च षडङ्गानि कृत्वा ध्यायेत्पराम्बिकाम ॥३॥

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता।
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना॥
या ब्रह्माच्युत शंकरप्रभृतिभिर्देवैः सदा पूजिता।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥४॥

महाबुद्धिः शिखां पातु ब्रह्मज्ञानस्वरुपिणी ।
सहस्त्रदळपद्मस्था शिरः पियुश रूपिणी ॥५॥

ललाटं ब्रह्म विख्यात सद्रुपा भृयुगं मम ।
चिद्रूपा नयने पातु औष्ठौ चानन्दरूपिणी ॥६॥

जिव्हां वागीश्वरी पातु चिबुकं पद्मजात्मजा ।
वाचं पातु महावाणी दन्तानश्चतु भारति ॥७॥

श्रवणो मे श्रुतिः पातु नासिकां चिन्तितार्थदा ।
कण्ठं मे नादरूपाव्यात वक्त्रं पातु सरस्वती ॥८॥

स्कन्धौ पातु महाविद्या स्तनौ पियुशदायिनि ।
चिन्तमणिर्मे हृदयं जठरं गणपप्रिया ॥९॥

पार्श्वेयोर्वेदजननि पृष्ठं विघ्नविनषानि ।
लिङ्गं विश्वाधिका पातु गुह्यं संस्मृतिनाशिनि ॥१०॥

उरु ज्ञानमयि पातु विध्या मे जानुनी सदा ।
मुक्तिदा जङ्घयोः पातु गुल्फ़योर्योगीवन्दिता ॥११॥

पादयोर्सर्वदा पातु परब्रह्मप्रदर्शिनि ।
भक्तप्रियकरि बाहु पाणि पुस्तकधारिणी ॥१२॥

अङ्गुळीर्वेदमुर्तिर्मे नखरानक्षरात्मिका ।
सर्वाङ्गानि महाबुद्धिः सर्वदा पातु सुन्दरी ॥१३॥

अनुक्तमपि यत्स्थानमात्मविध्या सदावतु ।
अग्रतः पातु मे भक्तिः श्रद्धा मे पृष्ठतोवतु ॥१४॥

प्राच्यां रक्षतु मां मेधा श्रुतिर्मे पातु दक्षिणे ।
स्मृतिर्मे पश्चिमे पातु धृतिर्मे पातु चोत्तरे ॥१५॥

आग्नेयां पातु मे प्रज्ञा नैऋत्त्यां पातु मे मतिः ।
वयव्यां पातु वागृपा समाधिः पातु शङ्करिम ॥१६॥

ऊर्ध्वं चोपनिषद्देवि गीतां मे वैष्णवी दिशं ।
दिवा मां मोक्षविध्याव्यात रात्रौ प्राकृतरूपिणी ॥१७॥

राक्षसासूरवेताळ ग्रह भूत पिशाचतः।
मूलाधाराब्जनिलया पातु मां ज्ञानरूपिणी ॥१८॥

मनश्चित्तवृत्तिमयि धर्मं यज्ञस्वरुपिणी।
तपो विध्या तपः पातु कुलं कर्मस्वरुपिणी ॥१९॥

पुत्रमित्रकळत्रादीन पातु मे शारदाम्बिका ।
आधि व्याधि भयेभ्यश्च पातु पियुशवर्षिणी ॥२०॥

द्वादशान्तस्त निलया पातु मां भवसागरात।
सर्वदा पातु मां बुद्धिः गणेशाङंकनिवासिनी ॥२१॥

इदं श्री बुद्धि कवचं ज्ञानकवैल्यदायकम।

रोगशत्रु भयहरं दुःखदारिद्र्यनाशनं ॥२२॥

धर्मार्थकामदं नृणां ज्ञानदं तु विशेषतः।
प्रातःकाले जपेद् भक्त्या गाणपत्यो दिने दिने ॥२३॥

श्रुति स्मृति मुखा विध्याः शान्ति भक्तिं च निश्चलम ।
ब्रह्मज्ञानम च संप्राप्य महाबुद्धि प्रसादतः ॥२४॥

संसारसागरं तीर्त्वा ब्रह्मसायुज्यमापनुयात ॥२५॥

॥इति श्री विनायक तंत्रे श्री बुद्धि देवी कवच
निरुपणम नाम एकोनविम्शत्ति पटलः ॥

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पर्ण मस्तु||